# Shri Shivananda Stotram

# શ્રીશિવાનન્દસ્તોત્રમ્

## Document Information

Text title : Shri Shivananda Stotram

File name : shivAnandastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Kumudaranjana Goswami

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશિવાનન્દસ્તોત્રમ્

લીલાસહચરં નિત્યમીશ્વરસ્ય યુગે યુગે ।
શિવકલ્પં શિવાનન્દં ભૂયો ભૂયો નમામ્યહમ્ ॥ ૧॥

નિર્વિકલ્પ-સમાધીપ્સા બાલ્યાદેવાશ્રયચ્ચ તમ્ ।
ત્યાગમૂર્તિં તિતિક્ષું યં પ્રાપ્ય સિદ્ધિમિતાऽચિરમ્ ॥ ૨॥

અલૌકિકાન્ ગુણાન્ દૃષ્ટ્વા વિવેકાનન્દરૂપિણા ।
“મહાપુરુષ” ઇત્યાખ્યા યસ્મૈ દત્તા નિજેચ્છયા ॥ ૩॥

ભારતીયાનિ તીર્થાનિ પરિક્રમ્ય સ્વલીલયા ।
સર્વત્રૈવેશ્વરં રૂપં દૃષ્ટવન્તં નમામિ તમ્ ॥ ૪॥

બહિર્યદ્ દૃશ્યતે કિં ચ સર્વં તદીશ્વરાત્મકમ્ ।
ઈશાતિરિક્તં નાસ્તીતિ મુક્તકણ્ઠં વ્યઘોષયત્ ॥ ૫॥

શ્રીરામકૃષ્ણદેવં શ્રીશારદાં જનનીં તથા ।
વિવેકાનન્દમૂર્તિં યોऽપશ્યદ્ હૃદિ નિરન્તરમ્ ॥ ૬॥

મુમુક્ષૂણામસઙ્ખ્યાનામાધ્યાત્મિકજલં દદત્ ।
ન્યપૂરયન્મનસ્તૃષ્ણાં શિવાનન્દં નમામિ તમ્ ॥ ૭॥

અનિર્વાણપ્રદીપસ્ય શિખાવત્ સત્યવિગ્રહમ્ ।
શિવાનન્દં સદા નૌમિ ધર્મમાર્ગ પ્રદર્શકમ્ ॥ ૮॥

શ્રીરામકૃષ્ણસઙ્ઘસ્ય દ્વિતીયં નાયકં વિભુમ્ ।
શિવકલ્પં શિવાનન્દમનન્તં પ્રણમામિ તમ્ ॥ ૯॥

શિવાનન્દસ્ય ચરિતં સ્મરન્તઃ શુદ્ધમાનસાઃ ।
બ્રહ્મસ્વરૂપતામન્તે યાન્તિ નાસ્ત્યત્ર સંશયઃ ॥ ૧૦॥

ઇતિ અધ્યાપકપણ્ડિત શ્રીકુમુદરઞ્જનગોસ્વામીતર્કવેદાન્તતીર્થવિરચિતં
“શ્રીમચ્છિવાનન્દસ્તોત્રમ્” સમ્પૂર્ણમ્ ।

પ્રણામમન્ત્રઃ-

શિવે યસ્ય પરાભક્તિસ્ત્યાગેઽપિ રતિરુત્તમા ।

અહેતુકકૃપાસિન્ધું શિવાનન્દં નમામ્યહમ્ ॥

Proofread by Aruna Narayanan

*Shri Shivananda Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*